Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 3 | ISSN : 2582-0095

# संस्कृतशिक्षणे अभिक्रमितानुदेशनोपागमः



डॉ॰ दातारामपाठक.

संविदाध्यापकः, शिक्षाशास्त्रविभागः

राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः

**शोधसार**

अभिक्रमितानुदेशनोपागमस्य बहवो हि लाभाः वर्तन्ते। यतोहि उपागमेऽस्मिन् शिक्षकस्य आवश्यकता एव न भवति। छात्रः स्वयमेव प्रश्नस्य उत्तरं ददाति। तं प्रतिपुष्टिः अपि शीघ्रं ददाति। यदि उत्तरं सम्यक् न आगच्छति। तु अग्रे यंत्रं न गच्छति। अतः अस्य उपयोगः शिक्षणे अवश्यं भवेत् ।

**शब्द कुट** – स्वबुद्धशिक्षणसिद्धान्तः, छात्रानुक्रियासिद्धान्तः, अंशादंशसिद्धान्तः, सक्रियासिद्धान्तः, सहभागितासिद्धान्तः, तत्कालप्रतिपुष्टिसिद्धान्तः, विविधसामग्रीसिद्धान्तः, छात्रपरीक्षणसिद्धान्तः, प्रगतिज्ञानसिद्धान्तः।

अभिक्रमितानुदेशनोपागमे शिक्षणवस्तु अल्पाल्पभागैः विभक्तं भवति। एवं च श्रृंखलाबद्धं भवति। अर्थात् अधिगमकर्ता स्वज्ञानानुसारेण स्वयमेव अस्मिन् उपागमे अध्ययनं कर्तुं शक्यते। किंचित्कालपर्यन्तं उत्तरं अपि प्राप्तुं शक्यते। अस्मिन् उपागमे यदि प्रथमः प्रश्नः सम्यक्

अस्ति तु तत्क्षणं यन्त्रमाध्यमेन तस्य उत्तरम् अपि आगच्छति। यदि प्रथमः प्रश्नः सम्यक् न वर्तते तर्हि अन्यं प्रश्नं पठितुं न शक्यते। इयं प्रक्रिया क्रमेण एव प्रचलति। अस्मिन् उपागमेशिक्षकस्य आवश्यकता न वर्तते। स्वयमेव स्वज्ञानेन प्रश्नस्य उत्तरं ददाति। अभिक्रमिताधिगमे अधिगन्ता सक्रियः भवति। अपेक्षितसमये तस्य प्रतिपुष्टिः अपि मिलति।

**अभिक्रमिताधिगमस्य अर्थः-**

क्रमबद्ध योजनाबद्धः वा। अर्थात् अभिक्रमिताधिगमः छात्राणां समक्षे विषयवस्तु अनेकेषु लघुखण्डेषु विभज्य प्रस्तूयते।

अभिक्रमिताधिगमस्य विषये गीतायाम् अपि उक्तं वर्तते यत्-

“नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।

स्वल्पमव्यस्य धर्मस्य जायते महतो भयात् ।।" (गीता 2/20)

अभिक्रम – "पाठ्यांशानां लघु-लघु अंशेषु तार्किकक्रमेण विभाजनं स्थापनं वा अभिक्रमः उच्यते। अभिक्रममाध्यमेन अध्ययनं हि अभिक्रमिताधिगमः उच्यते।"

**अभिक्रमिताधिगमस्य परिभाषा-**

1. स्मिथ मूरे- "अभिक्रमिताध्ययनम् अनुभवानां सुनियोजितक्रमः वर्तते। यः उद्दीपक-अनुक्रिया सम्बन्धत्वेन सक्षमता प्रति नयति ।"

2. सूसन मार्कले- "अभिक्रमित-अध्ययनं पुनः प्रस्तुतयोग्यानां क्रियाणां श्रृंखला निर्माणस्य सः विधिः वर्तते, येन व्यक्तिगतरूपेण छात्रस्य व्यवहारे मापनीयं विश्वसनीयं च परिवर्तनं आनेतुं शक्यते।

**अभिक्रमितानुदेशनोपागमस्य सिद्धान्ताः-**

1. स्वबुद्धशिक्षणसिद्धान्तः ।

2. छात्रानुक्रियासिद्धान्तः ।

3. अंशादंशसिद्धान्तः।

4. सक्रियासिद्धान्तः ।

5. सहभागितासिद्धान्तः ।

6. तत्कालप्रतिपुष्टिसिद्धान्तः।

7. विविधसामग्रीसिद्धान्तः ।

8. छात्रपरीक्षणसिद्धान्तः ।

9. प्रगतिज्ञानसिद्धान्तः।

10. व्यवहारविश्लेषणसिद्धान्तः ।

अभिक्रमितानुदेशनोपागमस्य विशेषता-अभिक्रमिनुदेशने अनेकाः विशेषताः वर्तते । यथा-

1. व्यक्तिनिष्ठता स्यात् ।

2. लघु-लघु अंशेषु पाठ्यसामग्री।

3. अग्रिमपदेन सह तार्किकता।

4. अधिगन्तुः सक्रियता।

5. प्रगतिविषयकः सूचना तत्कालपृष्ठपोषणं च ।

6. पूर्णपरीक्षितपाठ्यसामग्री।

7. उद्दीपन-अनुक्रिया-पुनर्बलनं तत्त्वानां क्रियाशीलता।

8. मनोवैज्ञानिकता। एते विन्दवः सन्ति ।

छात्रेभ्यः ज्ञानप्रदानं विविधैः उपायैः शिक्षकैः क्रियन्ते। परं सर्वमपि ज्ञानप्रदानम् अधिगमः न भवति। अतः विभिन्न-उपागमानां आश्रयः स्वीक्रियते। तेषु अभिक्रमित-शिक्षणं उत्तमरूपेण ज्ञानप्रदानाय प्रयुज्यते। एडगररोलमतानुसारम् 'शिक्षाप्रदानं निरर्थकं परिभाषाविहीनं किंचन परं, किन्तु अधिगमः काचितश्रेष्ठा शिक्षणव्यवस्था, यया उद्देश्यानि प्राप्तुं शक्यन्ते।"

**अभिक्रमिताधिगमस्य प्रकाराः-**

अभिक्रमिताधिगमस्य निम्नलिखितप्रकारा. वर्तन्ते। तद्यथा-

1. रेखीयाभिक्रमः

2. शाखीयाभिक्रमः

3. गणितीयाभिक्रमः

4. संगणकाभिक्रमः

**अभिक्रमितानुदेशनोपागमस्य लाभाः-**

1. छात्राणां कृते शिक्षकस्य आवश्यकता न वर्तते ।

2. उपागमेऽस्मिन् छात्रेषु आत्मविश्वासः एवं च आत्मनिर्भरतायाः भावनाविकासिताः भवन्ति ।।

3. छात्रेषु अभिरुचिः भवति।

4. स्वाध्यायस्य कृते प्रेरणा मिलति ।

5. अनुशासनस्य समस्या न भवति।

6. स्वयं कृत्वा अनुभवं प्राप्नोति। इत्यादयः ।

**अभिक्रमितानुदेशनोपागमस्य दोषाः -**

1. प्रणालीयं सर्वं यान्त्रिकप्रक्रियारूपेण चलति ।

2. कक्षायां भावात्मकपरिस्थितेः अभावः भवति।

3. शिक्षकस्य वैयक्तिक-प्रभावः छात्रेषु न पतति।

4. सामाजिकभावनायाः अभावः दृश्यते।

**सामग्रीनिर्माणम्-** निर्माणेऽस्मिन् नवभागा: सन्ति।

1. प्रकरणस्य, शीर्षकस्य वा चयनम्।

2. छात्राणां पूर्वज्ञान–पूर्वानुभव–सम्बद्धसूचनालेखनम् ।

3. व्यवहाररूपेण उद्देश्यानां लेखनम् ।।

4. विषयवस्तुन: स्वरूपनिर्माणम् ।

5. मापदण्डपरीक्षाया: निर्माणम् ।

6. अभिक्रमलेखनम् ।

7. प्राथमिकप्रतिवेदनलेखनम् ।

8. प्रतिवेदनपरीक्षणम्।

9. मूल्यांकनं, क्रमनिर्धारणं च ।

**निष्कर्ष**: - सारांशरूपेण अभिक्रमितानुदेशनोपागमस्य बहवो हि लाभा: वर्तन्ते। यतोहि उपागमेऽस्मिन् शिक्षकस्य आवश्यकता एव न भवति। छात्र: स्वयमेव प्रश्नस्य उत्तरं ददाति। तं प्रतिपुष्टि: अपि शीघ्रं ददाति। यदि उत्तरं सम्यक् न आगच्छति। तु अग्रे यंत्रं न गच्छति। अत: अस्य उपयोग: शिक्षणे अवश्यं भवेत् ।

**सन्दर्भग्रन्थसूची**:

1. संस्कृतशिक्षणम् – प्रो॰ सन्तोषमित्तल

2. शिक्षामनोविज्ञानम् – डॉ॰ फतेहसिंह

3. शैक्षिक प्रविधि: – डॉ॰ रमाकान्तमिश्र

4. संस्कृतशिक्षणम् – डॉ॰ कम्भम्पाटि साम्बशिवमूर्ति

5. संस्कृतशिक्षणम् – डॉ॰ एस.डी. सिंह

6. हिन्दी शिक्षण – श्री सुरेन्द्र सिंह कादियान

7. हिन्दी शिक्षण – डॉ. दाताराम पाठक